# Namamrita Rasayanam

# નામામૃતરસાયનમ્

## Document Information

Text title : nAmAmritarasAyanam

File name : nAmAmritarasAyanam.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Bodhendra Yati

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : <a href="https://archive.org/details/NaamaamrutaRasaayanamByShrimadBodhendraSaraswati">scan

Latest update : June 2, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નામામૃતરસાયનમ્

॥ શ્રીઃ ॥

સકૃત્પ્રપન્નજનતાસંરક્ષણદીક્ષિતાય શ્રીરામબ્રહ્મણે નમઃ ।
સદા સર્વેષ્ટદં જન્તોઃ સર્વારિષ્ટનિવારકમ્ ।
શ્રીરામનામ જયતુ શ્રેયોહેતુશિખામણિઃ ॥ ૧॥

સદાનન્દઃ શ્રીમાનનુપધિકકારુણ્યવિવશો
    જગત્ક્ષેમાય શ્રીહરિગિરિશરૂપં વિધૃતવાન્ ।
અપર્યાપ્તં રૂપં જગદવન એતત્પુનરિતિ
    પ્રભુર્જાગર્તિ શ્રીહરિગિરિશનામાત્મકતયા ॥ ૨॥

સકલભુવનરક્ષાપેક્ષયા યઃ પરાત્મા
    નિરવધિદયયા શ્રીશેશનામાત્મકઃ સન્ ।
પ્રવિલસતિ સદાસૌ સોઽનુકમ્પાસુધાબ્ધિ-
    ર્મમ ભવતુ તદાત્મા સુસ્થિરો વક્ત્રપદ્મે ॥ ૩॥

સર્વસ્ય લોકસ્ય સદા સુગુપ્ત્યૈ
    નામાત્મકો ભાતિ હરીશયોર્યઃ ।
દયાસુધાબ્ધિઃ સ તદાત્મકો મે
    રામઃ સદા વક્ત્રસરોરુહેઽસ્તુ ॥ ૪॥

યન્નામકીર્તનાદેવ દગ્ધદુર્જાતિકિલ્બિષઃ ।
કિરાતોઽભૂન્મુનિશ્રેષ્ઠો વાલ્મીકિરિતિ વિશ્રુતઃ ॥ ૫॥

વિદ્યાધરાખ્યવિપ્રોઽપિ યન્નામ્નઃ કીર્તનાદગાત્ ।
મુક્તિં તદ્રામનામ્ન્યેવ મમ વાગસ્તુ સર્વદા ॥ ૬॥

સકલભુવનકર્તા સચ્ચિદાનન્દરૂપો
    ગિરિશમુખસુરેન્દ્રૈર્ગીતકીર્તિઃ પરાત્મા ।
સકૃદુપગતરક્ષાદીક્ષિતઃ શ્રીનિવાસો

મમ હૃદિ નિવસન્માં પાતુ સીતાસમેતઃ ॥ ૭॥

નિર્માતા સ્થિતિકારકોઽસ્ય જગતઃ સર્વેશ્વરઃ સર્વગઃ
સચ્ચિદ્રૂપસુખાત્મકો વિજયતે સ્વાત્માખિલાનાં ચ યઃ ।
સાક્ષી વેદગિરેઽપ્યપાદકમલસ્ત્રાતા પ્રપત્તુઃ સકૃ-
દ્દેવોઽસૌ કૃપયાસ્તુ રક્ષણપરો રામો મુદા મે સદા ॥ ૮॥

સકૃત્પ્રપન્નસ્ય જનસ્ય રક્ષા
કૃપામ્બુધેર્યસ્ય મહદ્ વ્રતં સઃ ।
રામઃ સદાવ્યાદ્રમણીયકીર્તિઃ
સીતાપતિર્માં શરણં પ્રપન્નમ્ ॥ ૯॥

સૃષ્ટ્યાદિહેતુરખિલસ્ય ચરાચરસ્ય
દૃષ્ટ્યા નિરસ્તમદનાખિલગર્વરાશિઃ ।
પાતાખિલસ્ય જગતઃ પરમો નિયન્તા
સામ્બઃ સદા સ્ફુરતુ મે હૃદિ રામરૂપઃ ॥ ૧૦॥

ચેતનાનાં હિ સર્વેષાં યઃ સદા શઙ્કરઃ સદા ।
સ શિવઃ શઙ્કરો ભૂયાત્સદા મમ દયામ્બુધિઃ ॥ ૧૧॥

સકલનતજનાનાં રક્ષણે બદ્ધદીક્ષો
વરવટતરુમૂલે સંનિવિષ્ટોઽખિલાત્મા ।
સકલમુનિજનાનાં જ્ઞાનદાતા દયાબ્ધિઃ
પ્રદિશતુ સુમતિં મે દક્ષિણામૂર્તિદેવઃ ॥ ૧૨॥

વિજ્ઞાનવૈરાગ્યપરાત્મભક્તિ-
શમાદિભિર્યોઽધિકતાં પ્રપન્નઃ ।
વિશ્વાધિકાખ્યામગમચ્ચ તેન
ગુરૂત્તમં તં પ્રણમામિ મૂર્ધ્ના ॥ ૧૩॥

નત્વા ગણેશં નિખિલાંસ્તુ વિઘ્ના-
ઞ્જિત્વામરાસ્તોષમિયુસ્તમેવ ।
તત્ત્વાવબોધાય નમામિ મૂર્ધ્ના
નિત્યં નિહન્તું નિખિલાંસ્તુ વિઘ્નાન્ ॥ ૧૪॥

યા વેદશાસ્ત્રાત્મકવન્દ્યદેહા
સર્વૈઃ સુરેન્દ્રૈર્મુનિભિશ્ચ પૂજ્યા ।

શ્રીભારતી સા દયયા મદીયે
    જિહ્વાઙ્ગણે નૃત્યતુ સર્વદૈવ ॥ ૧૫॥

શાસ્ત્રાર્થં સુવિનિર્ણેતુમિષ્ટદં સર્વદેહિનામ્ ।
યતિરૂપધરં નૌમિ શઙ્કરં લોકશઙ્કરમ્ ॥ ૧૬॥

શ્રીરામસ્ય કૃપાદૃષ્ટ્યા તન્નામસ્મૃતિલબ્ધયા ।
રચ્યતે શ્રીભગવતો નામામૃતરસાયનમ્ ॥ ૧૭॥

નામકીર્તનરૂપો હિ ધર્મઃ શ્રીપરમાત્મનઃ ।
શ્રુતિસ્મૃતિપુરાણાદિશાસ્ત્રેષુ વિહિતઃ ક્રમાત્ ॥

સર્વાશ્રમણામન્યેષાં જનાનાં ચ ગરીયસામ્ ।
નિકૃષ્ટાનાં ચ સર્વેષાં સર્વાઘૌઘનિવારકઃ ॥

સર્વેષ્ટફલદો બ્રહ્મવિજ્ઞાનસ્ય સમુદ્ભવઃ ।
વેદોક્તઃ સર્વધર્માણાં સકલાશ્રમવાસિષુ ॥

અનુત્તમઃ શ્રુતઃ કશ્ચિન્નિયમં નૈવ વાઞ્છતિ ।
અતઃ સકલધર્મેભ્યઃ સુલભઃ સર્વમઙ્ગલઃ ॥

ઇત્યેતદર્થં સકલં સ્પષ્ટીચક્રે સ્વવાક્યતઃ ।
સહસ્રનામભાષ્યેઽસ્મિન્ભાષ્યકારો દયામ્બુધિઃ ॥

ઇતિ શ્રીમદ્બોધેન્દ્રવિરચિતં નામામૃતરસાયનં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

---

*Namamrita Rasayanam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*